# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2019

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः (20 अङ्काः)

1. अधोलिखितेषु एकः प्रश्नः समाधेयाः 10×1 = 10

(क) ज्ञानस्य स्वरूपं तथा ज्ञानार्जनस्य साधनानि श्रीमद्भगवद्गीतामाश्रित्य विचार्यताम्।

(ख) गुणस्वरूपं तथा गुणानां कार्याणि श्रीमद्भगवद्गीतायाः चतुर्दशाध्यायानुसारं लिख्यन्ताम्।

2. अधोविन्यस्तेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः 2×5 = 10

(क) 'इन्द्रियाणि' कतिविधानि ?

(ख) 'इन्द्रियाणि पराण्याहुः'— अत्र पराणि इति पदस्य कोऽर्थः ? कथमिन्द्रियाणि पराणि भवन्ति ?

(ग) 'ममैवांशो जीवलोक' इत्यत्र मम इति पदेन कस्योल्लेखः ? कस्तस्य अंशः ?

(घ) 'इन्द्रियाणि दशैकञ्च'— अत्र केषामिन्द्रियाणां ग्रहणम् ?

(ङ) 'एतत् क्षेत्रं समासेन सविकारमुदाहृतम्'— अत्र क्षेत्रं नाम किम् ?

(च) लोभप्रमादौ कुतः जायेते ?

(छ) कः योगारुढः उच्यते ?

(ज) मनः कानि इन्द्रियाणि आश्रित्य विषयानुपसेवते ?

### ख-विभागः (25 अङ्काः)

3. अधोलिखितेषु एकः प्रश्नः समाधेयः 10×1 = 10

(क) श्रीमद्भगवद्गीतानुसारं मनसः प्रकृतिः पर्यालोच्यताम्।

(ख) श्रीमद्भगवद्गीतायाः द्विवितीयेऽध्याये मनसः नियन्त्रणविषये यदुक्तं तत् समासेन आलोच्यताम्।

4. अधोनिबद्धेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरलिप्या च व्याख्या कार्या – 5×3 = 15

(क) धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥

(ख) किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥

(ग) व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥

(घ) काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥

(ङ) श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥

## ग-विभागः (05 अङ्काः)

5. अधोलिखितेषु एकं विषयमाश्रित्य संस्कृतेन देवनागरलिप्या च टीका लेख्या – 5×1 = 5

(क) प्रियः भक्तः।
(ख) श्रीमद्भगवद्गीता।
(ग) अचला श्रद्धा।

अथवा

अधोलिखितयोरेकस्य व्याख्या सुरगिरा देवनागरलिप्या च करणीया। 5×1 = 5

(क) यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥

(ख) ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥

——×——